हि॰ नो॰
३४

ले संतोषोऽभीरुत्वं षड्गुणाख्याता महत्त्वस्य सेपदास्तु स्थितेनम
न्योभवतिस्वल्पयाप्रियः कृतकृत्यो विधिर्मन्ये न वर्धयति तस्य
नो अपरं च निरुत्साहे निरानंदे निर्वीर्ये ऽरिनंदने मास्म
सीमंतिनी काचिज्जनयेत्पुत्रमीदृशम् तथाह्युक्तम् अल
ब्धं चैव लिप्सेत लब्धं रक्षेदवेक्षया रक्षितं वर्धयेत्सम्यग्वृद्धं
तीर्थेषु निःक्षिपेत् किं च अलब्धमिच्छतो ऽनुद्योगाद्रक्षणादेव
लब्धस्याप्यरक्षितस्य स्वयं विनाशः अवर्धमानश्चार्थः कालेन स्वल्पव्य
येपि अंजनवत्क्षीयते अनुपभुज्यमानश्च निष्प्रयोजन एव तथाचो
क्तं धनेन किं यो न ददाति नाश्नुते बलेन किं यो रिपुं न बाधते श्रु
तेन किं येन न धर्ममाचरेत् किमात्मना यो न जितेंद्रियो भवेत् अन्य

श्लोकः वर्धमानो महान्स्नेहः सिंहगोवृषयोर्वने पिशुनेनातिलुब्धे
न जंबुकेन विनाशितः राजपुत्रैरुक्तं कथमेतत् विष्णुशर्मोवाच
अस्ति दक्षिणापथे सुवर्णवती नाम नगरी तत्र वर्धमानो नाम म
हाधनो निवसति तस्य प्रचुरेपि वित्तेऽपरानतिसमृद्धानव
लोक्य पुनरर्थवृद्धिः करणीयेति मतिर्वभूव यतः अधोधः
पश्यतः कस्य महिमा नोपजायते उपर्युपरि पश्यन्तः सर्व एव द
द्रति अपरं च ब्रह्महापि नरः पूज्यो यस्यास्ति विपुलं धनं श
शिनस्तुल्यवंशोपि निर्धनः परिभूयते अन्यच्च अव्यवसायिन
मलसं दैवपरं साहसाच्च विहीनं प्रमदेव हि वृद्धपतिं नेच्छत्युप
गूहितुं लक्ष्मीः किंच आलस्यं स्त्रीसेवा सरोगता जन्मभूमिवात्स

हि॰ प॰ प्रविष्टः मंथरादयश्च सर्वे मृगश्च यथापदं स्वस्थाने गत्वा सुखमुपवि
३२ ष्टाः अथ राजपुत्रैः सानंदमुक्तं आर्य वयं सर्वे सुखिनः सम्पन्नाः
सिद्धं नः समीहितम् विष्णुशर्मोवाच एवं तावद्भवतामभिलाषि
तं सम्पन्नम् अपरमपीदमस्तु मित्रं प्राप्नुवन्तु सज्जनाः जनपदैर्लक्ष्मी
समालम्ब्यताम् भूपालाः परिपालयंतु वसुधां शश्वत्स्वधर्मे
स्थिताः आस्तां मानससतुष्टये सुकृतिनां नीतिर्नवोढेव वः
कल्याणं कुरुतां जनस्य भगवांश्चन्द्रार्धचूडामणिः इति श्री हितो
पदेशे मित्रलाभो नाम प्रथमकथासंग्रहः ॐ स्वस्ति श्रीगणेशा
य नमः अथ राजपुत्रैरुक्तं मित्रलाभः श्रुतस्तावदस्माभिरिदा
नीं सुहृद्भेदं श्रोतुमिच्छामः विष्णुशर्मोवाच शृणुत यस्याद्यः ।

तेमेनस्यामिसंनिहितेलुब्धकेसतिभवद्भिः पलायितव्यो ततश्चित्रांगो
गत्वास्तोकजलेमृतमिवात्मानंदर्शयतु तथानुष्ठितेसतिव्याधः श्रान्तः पा
नीयंपीत्वातरोरधस्तादुपविष्टः तथाविधंमृगमपश्यत् ततःक
च्छपंजलसमीपेनिधायकर्तिकामादायप्रहृष्टमनामृगांतिकं
चलितः तत्रांतरेहिरण्यकेन आगत्यबंधनंछिन्नंतत्र सकूर्मः स
त्वरंजलाशयंप्रविवेश समृगश्चासन्नंव्याधमालोक्यकाकोत्थायद्रुतं
पलायितः प्रत्यावृत्ययावल्लुब्धकस्तत्रमायातितावत्त
कूर्ममपश्यन्नचिंतयत् उचितमेतन्ममासमीक्ष्यकारिणः तथा
चोक्तं योध्रुवाणिपरित्यज्यअध्रुवाणिनिषेवते ध्रुवाणितस्यन
श्यंतिअध्रुवंनष्टमेवतत् ततोसौस्वकर्मवशान्निराशः कटकं